ॐ भगवद्विचारः

अनन्तानन्दनिधिं सच्चित्स्वरूपम्।
वन्दे नित्यम् अमृत्यस्वरूपं बालकृष्णम्॥

नित्यं निरन्तरानन्दं चिद्घनं ब्रह्मनिर्भयम्।
श्रुत्या तर्कानुभूतिभ्याम् अहमस्मि अद्वयम् सदा॥

इह खलु सर्वप्राणिनां परमलक्ष्यं भगवत्प्राप्तिरेव। "को भगवान्" इति विषये विविधमतानि सन्ति, अतः सन्दिग्धविषयम् एतत्। सन्दिग्धविषये विचारः आवश्यकम्। संशयनिवृत्तिपश्चात् एव निदिध्यासनसम्भवः। संशयनिवृत्तिस्तु विचारात् एव।

ननु भगवद्विचारः व्यर्थम् एव, भगवतः मनोवाचामगोचरत्वात् स्वस्वरूपभिन्नत्वात् च।

यद्यपि भगवान् मनोवागतीतः तथापि भावनाविषयमेव, भावनाफलं तु अपरोक्षानुभवम्। यथा दर्पणे दृश्यमानमुखं स्वमुखवीक्षणे उपयोगं तथा शास्त्रदर्पणे उक्त भगवत्-लक्षणानि स्वस्वरूपसाक्षात्कारे उपयोगम्। भगवत्-लक्षणानि स्पष्टमुक्तं श्रुतिस्मृतिपुराणादिग्रन्थे विशदरूपेण। सारमस्ति - भगवान् सच्चिदानन्दस्वरूपः, एकमेव अद्वितीयः सदा। स्वमायया स एव विश्वं सृष्ट्वा प्रविशति जीवरूपेण। उक्तं च - "तत् सृष्ट्वा तदेवानुप्राविशत्"।

"परमात्मा अद्वयानन्दः पूर्णः पूर्वं स्वमायया। स्वयमेव जगत् भूत्वा प्राविशत् जीवरूपतः" ॥

जगतः अनित्यत्वात् अभिन्ननिमित्तोपादानकारणकार्यत्वात् च, न भगवत् अद्वितीयत्व हानिः। माया न दूषणम्, अपि तु भूषणम् इति प्रसिद्धम्। तस्य अनिर्वचनीयत्वं तु सत्यव्यतिरिक्तत्वप्रमाणम् एव। आचार्यस्तु अज्ञानिनः अनुभवम् इति स्पष्टम् उक्तम्।

यथा स्वप्नद्रष्टा एव स्वप्नप्रपञ्चं तथा इहैव। यथा सर्परज्जुवत्, मरुमरीचिवत् वस्तु एकमेव, तथा सर्वं भगवानेव। उक्तं च - "सर्वं खलु इदं ब्रह्म", "ईशावास्यमिदं सर्वं", "अहमादिश्च मध्यं च भूतानाम् अन्त एव च", "नेह नानास्ति किञ्चन", "न तु तद्वितीयमस्ति", "मत्तः परतरं नान्यत् किञ्चित् अस्ति" इति।
श्रुतिः आहुः द्वैतं नामरूपमात्रमेव, कुण्डलादिषु भेदं नामरूपमेव, सर्वं तु कनकमेव। मृल्लोहादिषु अपि एतदेव। उक्तं च - "यथा सौम्य एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं", "अग्निर्यथैको भुवनं प्रतिष्ठो रूपं रूपं प्रतिरूपो बभूव एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च", "घटकुड्यादिकं सर्वं मृत्तिकामात्रमेव हि तद्वत् ब्रह्म जगत् सर्वम् इति वेदान्तडिण्डिमा ॥"

ननु एतानि लक्षणानि ब्रह्मणो एव, सत्यम्। ब्रह्मणो पर्यायवाची शब्द एव भगवान्, बहूनि नामानि सन्ति वस्तु एकमेव, यथा सूर्यस्य नामानि रविः दिवाकरः इत्यादि।

उक्तं च - "वदन्ति तत् तत्त्वविदः तत्त्वं यत्ज्ञानमद्वयं। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥"

भगवान् मनोवाचामगोचरः, निर्विषयत्वात् एव न असत्तया।
उक्तं च - "स्वयमेव अनुभूतित्वात् विद्यते न अनुभाव्यता। ज्ञातृज्ञानान्तराभावात् न तु असत्तया ॥"

ननु सर्वज्ञ सर्वव्यापी भगवान् कथं मम स्वरूपम् अस्ति इति चेत्, उच्यते।
अहमहमिति अन्तस्फुरन्तं चैतन्यं ब्रह्मैव, सच्चिदानन्दरूपत्वात्। उक्तं च - "अहमस्मि सदा भामि कदाचिन्नाहमप्रियः। ब्रह्मैवाहमतः सिद्धं सच्चिदानन्दलक्षणम् ॥" सर्वज्ञत्वम् सर्वव्यापित्वं तु स्वतो न, मायोपाधिवशात् एव। "देशः कोपि न भासेत यदि तर्ह्यस्त्वदेशभाक्। सर्वदेशप्रक्लृप्त्यैव सर्वगत्वं न तु स्वतः ॥"
"चेत्योपरागरूपा मे साक्षितापि न तात्विकी। उपलक्षणमेवायं निस्तरङ्गचिदम्बुदेः ॥"
तत्त्वमस्यादिमहावाक्येन स्पष्टं सिद्धम् अन्तस्फुरन्तं चैतन्यं, अहमितिशब्दगोचरं, ब्रह्मैव। भगवतोक्तं च - "क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत", "सर्वस्य चाहं हृदि सन्निविष्टो", "हृदि सर्वस्य विष्टितं", "ईश्वरः सर्वभूतानां हृद्देशे अर्जुन तिष्ठति" इति।

ननु अहं भगवतः भिन्नमेव, "मम साधर्म्यमागताः" इत्युक्तत्वात् इति चेत्, न। एतत् तु निराकृतं पूर्वोक्तश्लोकेन, भाष्यकारैरपि स्पष्टेन निराकृतम्। उपाधिः तु अज्ञानेन। अज्ञानं तु नास्त्येव आनन्ततीर्थैः अयुक्तम् इति उक्तत्वात् इति चेत्, न। तन्निराकरणमपि सुष्ठु निरस्तं मायावाददर्पणे।

अतो भगवान् यद्यपि मनोवाचामगोचरः तथापि स्वस्वरूपचैतन्यमेव यत् प्रसिद्धं निर्गुणपरब्रह्मेति ।

न विज्ञेयं "अहं भगवान्" इति चेत्, उच्यते मार्गम् अपरोक्षानुभवे । "अहं भगवान्" इति वचनं यः प्रोक्तं सः तु अहङ्कारयुक्त अज्ञानी एव, यदा न प्रोक्तं "सर्वमपि भगवान्" इति । अहं सर्वव्यापी सर्वाधारभगवान् इति अपरोक्षानुभवे मार्गं तु ज्ञानमेव । ज्ञानं तु भक्तिरेव भक्तिः तु भगवतार्पणं सर्वदा सर्वभावेन । कर्म तु भगवत्पूजा । कर्मफलं तु प्रसादं । भगवत्कृतम् एव अर्पितं कर्म भगवत्फलमपि तत्प्रसादं, अतः कर्ता नास्त्येव भोक्तापि च नास्ति । अतः अर्पितमानसं भगवत्व्याप्तं भवेत् । एतदेव भगवत्प्राप्तिः, आत्मनिवेदनम् इति प्रसिद्धम् अपि । ज्ञानी यः भगवत्स्मरणं सदा करोति, स एव श्रेष्ठ भक्तः । भक्त्या ज्ञानविस्मरणं नास्ति "तत्रापि न माहात्म्यज्ञानविस्मृति अपवादः" इत्युक्तत्वात् । ज्ञानी तु भगवानेव - "तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते" । अतिदुर्लभं ज्ञानी अस्मिन् जगति, अतः तस्मिन् समर्पणं तु भगवदर्पणमेव, मार्गमेव भगवत्प्राप्तेश्च । अर्पणं भक्ति ज्ञानं सर्वं तु सर्वव्याप्तभगवत्स्मरणमेव, एतदेव अनुसन्धानं निदिध्यासनम् च । स्मरणं तु मार्गमपि लक्ष्यमपि - "फलरूपत्वात्", "स्वयं फलरुपतेति" इत्युक्तत्वात् । सुलभमपि इत्युक्तं - "सुसुखं कर्तुं", "अनन्यचेताः यो मां स्मरति नित्यशः । तस्याहं सुलभः पार्थ नित्ययुक्तस्ययोगिनः" इति ।

अस्मिन् भुवने ज्ञानिनः सदा सन्ति, सर्वे भगवान् एव अतः तेषु समर्पणं भगवत्प्राप्तिमार्गमेव । तथैव ज्ञानी तु चिन्मयशिष्यवर्यतेजोमयानन्दगुरुवर एव ।

तस्मिन् जन्मदिनावसरे, तत्पादारविन्दे समर्पणं सर्वभावेन ब्रह्मकुमारलिखितं भगवद्विचारः नाम कृतिः। असकृत् नमस्कारः तत्पादारविन्दे।

अखिलशास्त्रवेत्तारम्।
भगवत्प्रेमभोक्तारम्।
शिष्यज्ञानदातारं।
वन्देहं तेजोमयम्॥

नरसुरादिपूजितम्।
हरिहरादिसेवितम्।
मुनिजनादिरक्षितम्।
सुखस्वरूपं वन्देहम्॥